संस्कृतवार्ता:

दिनाङ्क :-26.08.2025

प्रात: - 06:55

## प्रधानमन्त्री-गुजरातयात्रा

प्रधानमन्त्री नरेन्द्रमोदी अद्य गुजरात-भ्रमणस्य द्वितीये दिने अहमदाबादस्य हंसलपुरे शत-देशेषु हाईब्रिड्-बैट्री-इलेक्ट्रोड् इत्यस्य स्थानीय-उत्पादस्य, बैट्री-इलेक्ट्रिक्-वाहनानां निर्याताय च हरित-ध्वजं प्रदर्शयिष्यति। अवसरेऽस्मिन् श्रीमोदी एकां सभाम् अपि सम्बोधयिष्यति। प्रधानमन्त्री अहमदाबाद्-नगरस्य हन्सल्पुर्-नगरस्य सुजुकी-मोटर्-समवायस्य ऐतिहासिक पदाक्षेपस्य उद्घाटनं करिष्यति। श्रीमोदी "ई विटारा" इति वाहनस्य उद्घाटनम्, ध्वजप्रदर्शनं चापि करिष्यति, यत् सुजुकी इत्यस्य प्रथमं वैश्विक-सामरिक-बैटरी-विद्युत्-वाहनम् (बी. ई. वी.) इति अस्ति। गुजरातराज्यस्य टी. डी. एस्. लिथियम्-अयान् बैटरी-समवाये हैब्रिड्-बैटरि-एलेक्ट्रोड् इत्यस्य स्थानीय-उत्पादनस्य आरम्भेन सह भारतस्य बैटरि-इकोसिस्टम् इत्यस्य अग्रिम-चरणस्य उद्घाटनम् अपि प्रधानमन्त्री करिष्यति।

प्रधानमन्त्री ह्यः अहमदाबादनगरे चतुश्शताधिक-पञ्चसहस्रकोटिरुप्यकाणां विकासपरियोजनानां शुभारम्भं अकरोत्। गुजरातस्य द्विदिवसीययात्रावधौ असौ ह्यः उत्तर-गुजरात-विज-कंपनी-लिमिटेड इत्यस्यान्तर्गतम् अहमदाबाद-मेहसाणा-गान्धीनगरेषु च एकसहस्र-कोटिरुप्यतोऽप्यधिकानां विद्युत्-वितरणपरियोजनानाम् उद्घाटनमपि विहितवान् । तदनन्तरं सः एकां जनसभां संबोधयन् उक्तवान् यत् , कृषकाणां, पशुपालकानां, लघु-उद्यमशीलानां च हितं राष्ट्रस्य कृते अत्यन्तं महत्त्वपूर्णम् अस्ति इति।

## भारत-फिजीसन्धिः

भारतफिजीदेशाभ्याम् आतङ्कवादं विरुध्य असहिष्णुतायाः नीतिः पुनः स्मारिता सहैव उभौ देशौ ह्यः नवदिल्ल्यां स्वास्थ्यं, मानकीकरणं, क्षमतानिर्माणञ्च समेत्य नवसन्धि-ज्ञापनपत्रेषु हस्ताक्षरं कृतवन्तौ । प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः नवदिल्ल्याः हैदराबादभवने

फिजीदेशस्य प्रधानमन्त्रिणा सितिवेनी-राबुका इत्यमुना सह शिष्टमण्डल-स्तरा वार्ता साधिता। अवधेयं यत् फिजी-देशस्य प्रधानमन्त्री राबुका इत्येषः रविवासरे भारतस्य त्रिदिवसीयाधिकारिक यात्रायां नवदिल्ल्यां प्राप्तवान् आसीत्। सिटीवेनी लिगामामादा राबुका इत्येष: नवदिल्ल्याः राष्ट्रपतिभवने राष्ट्रपतिना द्रौपदीमुर्मु इत्यनया सह मिलितवान्। राष्ट्रपतिः द्रौपदी मुर्मू अवदत् यत्, भारतं प्रशान्तद्वीपदेशैः सह स्वस्य सम्बन्धान् विकास-सहभागित्वं च सुदृढं कर्तुं प्रतिबद्धः अस्ति, येषु फिजी-देशः विशिष्टसहभागी अस्ति।

भारतीय-नौसेना-उदयगिरि हिमगिरिः

भारतीय-नौसेना अद्य विशाखापत्तनम-नगरस्य नेवल्-बेस् इति नौसेना स्थात्रे उदयगिरि, हिमगिरि चेति उन्नते स्टील्थ्-युद्धनौके नियोजयिष्यतः। रक्षामंत्री राजनाथसिंहः अस्य समारोहस्य अध्यक्षतां करिष्यति।

शिवराजसिंह चौहानः

केन्द्रीयकृषि-कृषक-कल्याणमन्त्री शिवराजसिंह चौहानः उक्तवान् यत् प्रशासनेन भारतीय-कृषकाणां हितं कल्याणं च सर्वोपरि संस्थाप्य अमेरिकादेशात् कृषिउत्पादानां आयाताय स्वीकृतः न प्रदत्ता । भोपाल्-नगरे भारतीय-विज्ञान-शिक्षा-अनुसंधान-संस्थानस्य दीक्षान्तसमारोहं सम्बोधयन् श्री चौहानः अवदत् यत्, नवभारते आत्मविश्वासः अस्ति, स्वजनानाम् हितानां रक्षणाय प्रतिबद्धः अस्ति।

सर्वकारः-समितिः

सरदार वल्लभभाई पटेलस्य, आदिवासिनां आदर्शस्य बिर्सा मुण्डायाः च सार्धैकशततमं जयन्ती वार्षिकम्, अटल-बिहारी-वाजपेयी वर्यस्य जन्मशताब्दिम् च आचरितुं सर्वकारः तिस्रः उच्च-स्तरीय-समितयः अस्थापयत्। केन्द्रीय-संस्कृति-मन्त्रालयस्य अनुसारं, प्रधानमन्त्री नरेन्द्रमोदी तिसृणां समितीनाम् अध्यक्षः भविष्यति। सम्पूर्णे देशे योजनानां, कार्यक्रमाणां अनुमोदनं, पर्यवेक्षणम्, स्मरणोत्सवस्य मार्गदर्शनं च समित्याः दायित्वम् अस्ति।